Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २४४
ऑगस्ट - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### सज्जनस्य सायुज्यम्

दुर्जनः दूरात् परिहर्तव्यः इति नैकधा सुभाषितकाराः वदन्ति। परन्तु कः दुर्जनः ? कः सज्जनः ? इत्यत्र सत्यस्य निष्कर्षे चतुरः मनुष्यः अपि क्वचित् विडम्बनां प्राप्नोति। यतो हि लोकवृत्तिः प्रकृत्या एव जटिला अस्ति। तथापि कैश्चित् लक्षणैः वयं खलसज्जनयोः भेदरेखां द्रष्टुं शक्नुमः। अस्मिन् विषये लेखनात् पूर्वं काचित् स्पष्टता आवश्यकी। अयं लेखकः स्वीये जीवने मनुष्याणाम् अवगमने नितरां निष्फलः अस्ति!

यः मनुष्यः भवतः सुखेन सुखी भवति सः सज्जनः। दुर्जनः ईर्ष्यायाः स्वामी भवति। ईर्ष्यालुः दूरात् त्यक्तव्यः।

सज्जनः भवता कृतेन लघुना उपकारेण अपि तुष्यति। भवता प्रेम्णा दत्तं तुच्छं वस्तु अपि सः बहु मन्यते। सः द्रव्यं न पश्यति, अपि तु भावं पश्यति। सज्जनः दुर्गुणान् विस्मृत्य सद्गुणेषु आदरं करोति। दोषाणाम् अपनयनम्, गुणानां संवर्धनं च तस्य कर्तव्यं भवति।

सज्जनः आशादीपः भवति। तस्य सायुज्यमात्रेण नैराश्यं नश्यति। सज्जनः नवचेतनां जागरयति।

सज्जनः भवता निवेद्यमानं सर्वं श्रद्धया शृणोति। भवतः जीवने कष्टं चेत् सः तस्य परिहारं गभीरतया चिन्तयति। अपि च सः प्रत्यक्षं साहाय्यं करोति। केवलं वाग्विलासं न करोति।

सज्जनः सदा अनुकूलः भवति। उत्तमासु रुचिषु समर्थनं करोति। भवति विद्यमानाः विविधाः रुचीः सः जानाति। तुलसीदासः लिखति– 'तुम रक्षक काहु को डरना।' सज्जनः अभयं ददाति। यथा कुशलः नाविकः निमज्जन्तीं नौकां पारयति, तथैव सज्जनः नित्यम् उपतिष्ठति।

भवान् तस्य पुरतः हृदयम् उद्घाट्य सर्वविधं वृत्तं निवेदयितुं शक्नोति। भवतः दुर्बलान् अंशान् सः कुत्रापि न प्रकटयति। बुद्धिमान् सज्जनः भवतः स्वभावं निरीक्षते। स्वभावे विद्यमानान् दोषान् सहते। उचिते काले दोषान् परिष्करोति। कुशलः शिल्पी इव सज्जनः भवतः जीवनं सुन्दरतमं करोति।

एतेषु विषयेषु भर्तृहरिः किमपि वक्तुम् इच्छति। सावधानं शृणुमः।

**पापान्निवारयति योजयते हिताय गुह्यं च गूहति गुणान्प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥**

# योग्यं मूल्यम्



यस्मिन् काले राजा ब्रह्मदत्तः काशीराज्यं पालयति स्म, तस्मिन् एव काले बोधिसत्त्वः तस्यैव राज्यस्य क्रयाधिकारित्वेन नियुक्तः आसीत्। क्रयणविषये तस्यैव निर्णयः अन्तिमः। तेन यत् मूल्यं निर्णीयते स्म, तदेव राज्ञा अनुमन्यते स्म। अतः क्रयाधिकारिणः व्यवहारज्ञानं प्रमुखं भवति स्म।

बोधिसत्त्वः काशीराजस्य उपयोगार्थं गजानाम्, अश्वानां, सुवर्णरजतवज्रादीनां च परीक्षां कृत्वा स्वस्य गणनानुगुणम् एव मूल्यनिश्चयं कृत्वा वणिग्भ्यः योग्यं धनं दापयति स्म। तेन निश्चीयमानं मूल्यं वणिजाम् अपि तृप्तिकरं भवति स्म। अतः सर्वे तस्य व्यवहारस्य विषये सन्तुष्टाः आसन्।

किन्तु राजा ब्रह्मदत्तः लोभी आसीत्। अतः सः क्रयाधिकारिणः बोधिसत्त्वस्य विषये सन्देहग्रस्तः जातः। एषः वस्तूनि अधिकमूल्येन क्रीत्वा वणिग्भ्यः प्रभूतं धनं दापयति इति राज्ञा श्रुतम् आसीत्। 'एतत् सत्यमेव स्यात्। यदि एवमेव सर्वदा प्रवर्तेत तर्हि मम कोषागारम् अचिरात् एव रिक्तं भवेत्' इति चिन्तितवान् राजा।

कदाचित् सः अन्तःपुरे उपविश्य उद्यानस्य दिशि विद्यमानं वातायनम् उद्घाटितवान्। तदा तत्र आतपे महता श्रमेण सस्यानि जलेन सिञ्चन् कश्चन सेवकः तेन दृष्टः। 'एषः एव अत्यन्तं विश्वासयोग्यः' इति चिन्तितवान् राजा अनन्तरदिने एव तं सेवकं नूतनक्रयाधिकारित्वेन नियुक्तवान्।'एषः नूतनः क्रयाधिकारी वाणिज्यवस्तूनां प्राणिनां च मूल्यविषये मह्यं बहु लाभं दापयेत्' – इति राजा चिन्तयति स्म। सः नूतनः क्रयाधिकारी तु अल्पज्ञः आसीत्। सः वस्तूनां गुणावगुणान् न जानाति स्म। पशूनां ज्ञानं तु सर्वथा न आसीत् तस्य। अतः पशूनां, वस्तूनां वा क्रयणं यदा करणीयं भवति तदा यत् मूल्यं मनसि आगच्छति तदेव वदति स्म सः। अतः बहवः वणिजः हानिम् अनुभूतवन्तः।

तथापि एषः नूतनः क्रयाधिकारी राज्ञा एव नियुक्तः इत्यतः ते यावत् लब्धं तावत् एव स्वीकृत्य मुखं म्लानीकृत्य गच्छन्ति स्म। कदाचित् उत्तरदेशात् कश्चन अश्ववणिक् उत्तमजातीयान् पञ्चशतम् अश्वान् आनीतवान् काशीराजाय विक्रयणार्थम्। एतत् ज्ञातवान् राजा क्रयाधिकारिणम् आदिशत् – 'योग्यतां परीक्ष्य एतेषां मूल्यं निश्चिनोतु' इति। क्रयाधिकारी आगत्य पञ्चशतम् अश्वान् अपि परीक्षितुम् आरब्धवान्। अश्वानां पुच्छं गृह्णन्, पृष्ठं ताडयन् परीक्षां कृतवान् सः। ''एतेषां पञ्चशतस्य अश्वानां मूल्यं गोणीमितेन तण्डुलेन समं स्यात्। अतः तावत् तण्डुलं दत्त्वा सर्वान् अश्वान् अश्वालये बध्नन्तु'' इति आदिष्टवान् सः।

एतत् श्रुत्वा अश्ववणिक् दिग्भ्रान्तः। सः अन्यवणिजः इव मौनं न आश्रितवान्। सः साक्षात् पुरातनस्य क्रयाधिकारिणः बोधिसत्त्वस्य समीपं गत्वा प्रवृत्तं सर्वं विवृतवान्।

बोधिसत्त्वः सर्वमपि वृत्तान्तं श्रुत्वा उक्तवान् – ''भोः, भवान् एकं कार्यं करोतु। नूतनम् एतं क्रयाधिकारिणं

तर्पयितुं किञ्चित् उत्कोचं दत्त्वा – 'गोणीमितस्य तण्डुलस्य मूल्यं किम् इति भवान् श्वः राजसभायां वदतु। तत् श्रुत्वा राजा भवन्तं सम्मानयेत्' इति उक्त्वा राजसभां प्रति नयतु। अहं तत्र स्थित्वा भवते न्याय्यं मूल्यं दापयिष्यामि'' इति।

एतेन अश्ववणिक् किञ्चिदिव समाहितः। बोधिसत्त्वः यथा उक्तवान् तथैव सः अश्ववणिक् क्रयाधिकारिणे उत्कोचं दत्त्वा तं सम्यक् प्रशंसितवान्।

क्रयाधिकारी उत्कोचं स्वीकृत्य सन्तोषेण वणिजः प्रार्थनाम् अङ्गीकृतवान्। अनन्तरदिने राज्ञः आस्थाने मन्त्रिणः, पुरप्रमुखाः, प्रमुखाः अधिकारिणः इत्यादयः सर्वे सम्मिलिताः। बोधिसत्त्वः अपि उपस्थितः आसीत्।

हानिम् अनुभूतवान् अश्ववणिक् राजानम् उद्दिश्य उक्तवान् – ''प्रभो! भवतः राज्यस्य क्रयाधिकारिणा मम पञ्चशतस्य अश्वानां मूल्यं गोणीपरिमितस्य तण्डुलस्य मूल्येन समानम् इति निर्णीतम् अस्ति। गोणीमितस्य तण्डुलस्य मूल्यं कियदिति न ज्ञातं मया'' इति। राजा वणिजः वचनं श्रुत्वा आश्चर्यम् अनुभवन् क्रयाधिकारिणं पृष्टवान् – ''अश्वाः कियता मूल्येन क्रीताः ?'' इति। ''एकगोणीपरिमितस्य तण्डुलस्य यत् मूल्यं तदेव मूल्यं तेषाम् अपि निश्चितवान् अस्मि महाप्रभो!'' इति उक्तवान् क्रयाधिकारी।

''एवम्! युक्तम् एतत्। गोणीपरिमितस्य तण्डुलस्य किं मूल्यं भवति इति किं भवान् जानाति ?'' इति अपृच्छत् राजा।

आस्थानस्य क्रयाधिकारी अनुक्षणम् एव अवदत् – ''गोणीपरिमितस्य तण्डुलस्य मूल्यं बहु अधिकम् एव। एतस्य काशीराज्यस्य, समीपस्थानां सामन्तराज्यानां च यावत् मूल्यं भवेत् तावत्'' इति।

तस्य क्रयाधिकारिणः वचनं श्रुत्वा सभासदः करताडनं कुर्वन्तः उच्चैः हसितवन्तः।

यदा हासस्य ध्वनिः न्यूनः जातः तदा कश्चन प्रमुखः उत्थाय, नूतनं क्रयाधिकारिणम् ''एतावत्पर्यन्तं वयं राज्यानि अमूल्यानि इति चिन्तितवन्तः आस्म। किन्तु काशीराज्यस्य सामन्तराज्यानां च मूल्यं गोणीपरिमितस्य तण्डुलस्य मूल्यात् अपि न्यूनम् अस्ति इति इदानीमेव ज्ञातम् अस्माभिः। अहो! अस्य बुद्धिशक्तिः अपूर्वा एव'' इति उपहासपूर्वकम् उक्तवान्। तदा बोधिसत्त्वः सभायाः पुरतः आगत्य ''एषः क्रयाधिकारी यत् उक्तवान् तत् परमसत्यम् अस्ति। अत्र ऊहायोग्यं किमपि नास्ति। सः स्वस्य स्तरानुगुणम् एव गणितवान् अस्ति। पञ्चशतस्य अश्वानां मूल्यं गोणीपरिमितेन तण्डुलमूल्येन तुल्यम् इति, गोणीपरिमितस्य तण्डुलस्य मूल्यं काशीराज्य–सामन्तराज्यानां मूल्यादपि अधिकम् इति च सः उक्तवान् अस्ति। अत्र सः सुवर्णमुद्राः तण्डुलशब्देन निर्दिष्टवान् अस्ति। पञ्चशतस्य श्रेष्ठजातीयानाम् अश्वानाम् मूल्यनिश्चयार्थम् अहम् असमर्थः, तेषां कृते यावत् मूल्यं दीयते चेदपि अपर्याप्तं भवति इति परोक्षतया उक्तवान् अस्ति सः। अतः तेन न्याय्यं मूल्यमेव निर्णीतम् अस्ति इत्यत्र नास्ति सन्देहः'' इति उक्तवान्।

बोधिसत्त्वस्य वचनं सर्वे सम्मतिपूर्वकम् अङ्गीकृतवन्तः।

एतया घटनया काशीराजः स्वस्य दोषम् अवगतवान्। अज्ञानिनं कञ्चित् क्रयाधिकारिणः स्थाने नियुक्तवान् अहमेव दोषी इति मत्वा सः तं निष्कास्य बोधिसत्त्वाय तत् पदं दत्तवान्। बोधिसत्त्वः पुनरपि क्रयाधिकारित्वेन नियुक्तः जातः। विदेशीयः अश्ववणिक् योग्यं मूल्यं प्राप्तवान्।

# अभिज्ञानशाकुन्तलम् ( ग्रन्थपरिचयः )

व्योम शाहः

( अनुवर्तते ... )

महाकविकालिदासेन प्रणीते अभिज्ञानशाकुन्तलाभिधाने नाटके एतावता अस्माभिः दृष्टं यत् पुरा आश्रमस्थितायां शकुन्तलायाम् अनुरक्तः राजा तया सह गान्धर्वेण विवाहेन परिणीतः । ततः दुर्वासोमुनिशापवशेन विस्मृता शकुन्तला अङ्गुलीयकप्राप्त्या पुनरपि स्मृतिपथं नीता। इदानीं राजा विरहदुःखं सहते। इतः स्वर्गे युद्धार्थम् आहूतः राजा। तत्र विजित्य पुनरपि पृथ्वीं समागच्छन् सः हेमकूटपर्वते मुनिपतिदर्शनार्थम् अवतीर्णः। इह कश्चित् बालः सिंहशिशुना सह क्रीडति।

बालस्य ईदृशानि वचांसि राज्ञः मनः आकर्षति। तापसी सोपालम्भं कथयति यत् महर्षिभिः 'सर्वदमनः' इति नाम युक्तमेव कृतम्। इतः राज्ञः मनसि अस्मै बालाय पुत्रवत् स्नेहः समुल्लसति। तस्य शौर्यं दृष्ट्वा राजा चिन्तयति —

**महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।**
**स्फुलिङ्गावस्थया वह्निरेधःक्षय इव स्थितः ॥७/१५॥**

इतः एका तापसी तं बालमृगेन्द्रं वारयितुं यतते। अन्यक्रीडनकस्य लिप्सया सः हस्तं प्रसारयति। मङ्कणकस्य ऋषिकुमारस्य ऊटजे कश्चित् मृत्तिकामयः मयूरः वर्तते । सा तं ग्रहीतुं गता । अथ सः बालः अन्यया तापस्या निवारितोऽपि तेनैव सिंहशिशुना सह तावत् कालम् अक्रीडत्। तं निवारयितुं सा तापसी कञ्चिद् ऋषिकुमारम् आह्वातुम् इतस्ततः पश्यति । तत्रैव तया राजा दृष्टः । सा बालमृगेन्द्रं मोचयितुं तं न्यवेदयत् । राजा उपगच्छति । "अयि भोः महर्षिपुत्रक !" इति राज्ञा संबोधिते तापसी कथयति यत् स बालः ऋषिकुमारः नास्ति। तापसीवचसा ज्ञातं यत् अयं बालः पौरवः । आत्मनः एव कुलमिति ज्ञात्वा सः प्रमुदितः । कथंचित् तस्य पितुः नाम पृष्टे "को तस्स धम्मदारपरिच्चाइणो णामं कित्तइस्सदि [कः तस्य धर्मदारपरित्यागिनः नाम कीर्तयिष्यति]" इति तया प्रोक्तम् । परदारव्यवहारं परिहरन् सः मातुः नाम न पृष्टवान्। एतावता क्रीडनकमानेतुं गता तापसी प्रत्यागता। मृत्तिकामयं मयूरं निर्दिश्य सा वक्ति – "सव्वदमण ! पेक्ख सउतलावण्णं [सर्वदमन ! प्रेक्षस्व शकुन्तलावण्यम्]" । मातुः नाम्ना सादृश्येन डिम्भः तस्याः विषये पृच्छति । अचिरेण सः तेन मयूरेण सह क्रीडितुं लग्नः । क्रीडतः बालस्य हस्ते रक्षागण्डः तापसीभ्यां न दृष्टः । यदा ते इतस्ततः अपश्यताम्, तदा दुष्यन्तेन सः लक्षितः । यावता सः तस्य ग्रहणात् प्रतिषिद्धः तापसीभ्यां तावता कालेन तेन सः गृहीतः।

इदं दृष्ट्वा अक्षुण्णं राजानं तापसी तस्य बालस्य जातकर्मवृत्तं निवेदयति। भगवता मारीचेन अस्य बालस्य जातकर्मसमये अपराजितानामधेया दिव्यौषधिः दत्ता । तेन तं रक्षागण्डं पितरौ आत्मानं च विहाय अन्यः ग्रहीतुं नाऽर्हति। यदि कश्चित् गृह्णीयात् तर्हि सः गण्डः सर्पीभूय तं दशति। अनेन ज्ञातं यत् सः बालः स्वकीयः एव पुत्रः। सः तं परिष्वजते। एका तापसी इमं वृत्तान्तं निवेदयितुं शकुन्तलां प्रति गच्छति। शकुन्तला समागता। तां दृष्ट्वा सहर्षं सखेदं राजा उच्चरति –

**वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।**
**अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥७/२१॥**

( क्रमशः... )

## मासवार्त्ता:

### सम्पन्न: Diploma in Sanskrit Teaching अभ्यासक्रम: ।




एकलव्य-संस्कृत-फाउण्डेशन-संस्थानस्य २०२५-२६ तमवर्षस्य 'Diploma in Sanskrit Teaching' इति अभ्यासक्रम: जुलाईमासस्य २३ दिनाङ्के सम्पन्न: । संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय अयम् अभ्यासक्रम: संस्थया सञ्चाल्यते । एतम् अभ्यासक्रमं प्रति विभिन्नेभ्य: क्षेत्रेभ्य: आगता: शिक्षका: समाजे संस्कृतभाषां पाठयितुम् उत्सुका: वर्तन्ते । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयमान्य: वर्तते।

### सम्पन्न: सन्धिवर्ग:

संस्कृतव्याकरणं पठितुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-फाउण्डेशनसंस्थानं प्रतिवर्षं सन्धिवर्गस्य आयोजनं करोति । एतस्मिन् उपक्रमे जुलाईमासस्य २ दिनाङ्कात: ३० दिनाङ्कं यावत् सन्धिवर्गस्य आयोजनम् अभवत्। अभ्यासक्रमेऽस्मिन् प्रमुखानां सन्धीनाम् अध्यापनं श्रीश्याम: पटेल: अकारयत्।

### आयोजितं व्याख्यानम्



संस्कृतरसिका: संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयु: इति विचार्य एकलव्य-संस्कृत-फाउण्डेशनसंस्थानं संस्कृतसाहित्यरसास्वाद-व्याख्यानमालाया: आयोजनं करोति । आयोजनेऽस्मिन् एकलव्य-संस्कृत-फाउण्डेशनसंस्थानस्य गान्धिनगरकेन्द्रे जुलाईमासस्य ११ दिनाङ्के डॉ. जय: ओझा (अध्यापक:, चिल्ड्रन्स युनि.) 'मृच्छकटिकम्' इति विषये व्याख्यानम् अकरोत्। व्याख्यानस्य श्रवणेन संस्कृतरसिका: प्रसन्ना: आसन्।

## कृपया हसन्तु

**शिक्षकः** - (नमनं प्रति) त्वया कुत्रापि किञ्चित् अभिनन्दनीयं कार्यं कृतं वा ?

**नमनः** - आम्, कृतम् ।

**शिक्षकः** - कीदृशं कार्यम् ?

**नमनः** - एकदा मम मित्रं रमणः अतीव मन्दं मन्दं गृहं गच्छन् आसीत् । तदा मया तस्य पृष्ठतः मम शुनकः त्यक्तः, अनन्तरं सः शीघ्रमेव गृहं प्राप्तवान् ।

★ ★ ★ ★ ★

**शिक्षकः** - भोः रमण ! त्वया लिखितः 'मम धेनुः' इति लेखः पञ्चवर्षेभ्यः पूर्वं तव भगिन्या लिखितस्य लेखस्य इव समानः वर्तते, किमर्थं तत् चोरितवान् ?

**रमणः** - न महोदय ! अस्माकं धेनुः एका एव, सा च इदानीमपि अस्माकं गृहे पूर्ववदेव अस्ति, अतः आवयोः लेखः समानः दृश्यते ।

★ ★ ★ ★ ★

**पतिः** - (पत्नीम् उदिश्य) भोः श्वः नूतनवर्षस्य प्रारम्भः भविष्यति । वदतु कम् उपहारं इच्छति भवती ?

**पत्नी** - तादृशम् उपहारं ददातु यः आवर्षं प्रचलेत् ।

**पतिः** - तदा तु पञ्चाङ्गम् एव स्वीकरोतु प्रिये ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**सह परिजनेन विलसति धीरो गहनानि तरति पुनरेकः ।**
**विषमेकेन निपीतं त्रिपुरजिता सह सुरैरमृतम् ॥**

**तात्पर्यम्** – धीरः एकाकी चेदपि स्वजनान् अत्यन्तकष्टकालात् रक्षित्वा प्रसिद्धः भवति । यथा त्रिपुरनामानं राक्षसं जितवान् यः, सः, शिवः समुद्रमथनकाले उत्पन्नं विषं स्वयम् एकः एव पीत्वा सर्वान् देवान् रक्षितवान्, अन्ये देवाः अमृतं पीतवन्तः तथा धीराणां कार्याणि भवन्ति ।

**सहसा विदधीत न क्रीयामविवेकः परमापदां पदम् ।**
**वृणुते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥**

**तात्पर्यम्** – जीवने सर्वदा विचिन्त्य एव सर्वे व्यवहाराः कर्तव्याः । कोऽपि जनः अविचिन्त्य दृढात् किमपि कार्यं न कुर्यात् । यदि तथा क्रियते तर्हि तादृशम् अविवेकिनं महत्यः आपदः आवृण्वन्ति । किन्तु यः सम्यक् विचार्य पदं स्थापयति सः उत्तमफलानि एव प्राप्नोति । तस्य गुणैः आकृष्टा सम्पत्तिः स्वयमेव धावन्ती तत्समीपम् आगच्छति ।

**सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।**
**तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥**

**तात्पर्यम्** – हितं या वदेत् सा पत्नी, यस्मात् शान्तिः प्राप्येत सः पुत्रः, यस्मिन् गाढः विश्वासः स्यात् सः एव स्नेहितः । यत्र जीवनं निरातङ्कं स्यात् सः एव वस्तुतः देशः ।

## ज्ञानसरित्

**श्यामः पटेलः**




**अथ फेनकस्नानम् ?** अद्यत्वे सर्वत्र स्वच्छतायै लिक्विड-सोप वा बेधिंग-सोप इत्यस्य प्रयोगो विहितोऽस्ति। तन्निमित्तं संस्कृते फेनकम् इति नाम व्यवह्रियते। किन्तु मनसि जिज्ञासा जायते यत् पूर्वे जनाः देहशुद्ध्यर्थं कस्य प्रयोगं कुर्वन्ति स्म ? तज्ज्ञातुं यतामहे ।भारतदेशे तु मृत्तिका-भस्मनोः प्रयोगः प्राचुर्येण भवति स्म । आयुर्वेदिकग्रन्थानुसारम् औषधिमिश्रितस्य तैलस्य उपयोगेन अभ्यङ्गस्नानं क्रियते स्म। एतेषां प्रयोगः अद्यावधि भवति। यादृशस्य फेनकस्य प्रयोगं वयम् अद्य कुर्मः तादृशस्य फेनकस्य उपयोगः बेबीलोनसाम्राज्ये सहस्रेभ्यः वर्षेभ्यः पूर्वं प्रचलति स्म इति प्राचीनावशेषैः ज्ञायते। तदा फेनकं महार्घेषु वस्तुषु परिगण्यते स्म। केवलं राजपरिवारः श्रीमन्तः जनाः वा एव उपयोगं कुर्वन्ति स्म। प्राचीनकाले रोमनसंस्कृतेः जनाः सेंपो-पर्वतस्य उपरि स्थिते तेषां देवस्थानके देवतायै पशोः बलिप्रदानं कुर्वन्ति स्म। तेषां मृतपशूनां मेदः तस्मात् पर्वतात् प्रवहन्त्याः नद्याः प्रवाहे मिश्रितं भवति स्म। तादृशेन जलेन वस्त्राणां शुद्धिः सम्यक् भवति इति ज्ञातवन्तः ते जनाः मेदतैलभस्मनां मिश्रणं कृत्वा खण्डरूपेण फेनकस्य निर्माणं कृतवन्तः । सेंपो-पर्वतस्य नाम्ना एव एतस्य नाम 'सोप' इति अभवत् । मिसरसंस्कृतेः जनाः अपि सुगन्धियुक्तं तैलं प्रयुज्य फेनकस्य निर्माणं कुर्वन्ति स्म । किन्तु आधुनिके युगे सर्वत्र यत् रसायणयुक्तं फेनकं प्रयुज्यते तस्य निर्माणं ख्रिस्ताब्दस्य १७६१तमे वर्षे फ्रान्सदेशीयः रसायणशास्त्री निकोलस-बेब्लाङ्कमहोदयः कृतवान् । तेन एव लवणात् 'सोडियम कार्बोनेट' इत्यस्य निर्माणं कृत्वा मेदतैलयोः तत् संमिश्र्य तैलीय-फेनकस्य उत्पादनम् आरब्धम्।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **कुलीनः** | कुलीन | well-born |
| **सावित्री** | प्रकाश की किरण | a ray of light |
| **प्रौढः** | पूर्णविकसित | sublimity |
| **पक्व** | पकाया हुआ | cooked |
| **उपोषणम्** | उपवास रखना | fast |
| **आनुमानिकः** | उपसंहार से संबन्ध रखने वाला | relating to a conclusion |
| **प्रकीर्णकः** | छितरे हुए | scattered |
| **जीविका** | रोजगार | livelihood |
| **सामवायिकः** | किसी संग्रह या संघात से संबद्ध | belonging to an assembly |
| **वर्तुलः** | गोल | round |
| **परिवेष्टनम्** | घेरना | surrounding |
| **जम्भकः** | द्रोही | treacherous |
| **वामनिका** | ठिंगनी स्त्री | female dwarf |
| **अनुपन्यासः** | वर्णन न करना | not mentioning |
| **उद्वासनम्** | बाहर निकालना | expelling |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु भगवतः शिवस्य वाद्यं किं वर्तते ?**
(क) वेणुः (ख) ढक्का (ग) मृदङ्गम् (घ) वीणा

**२ ) वीणा कस्याः देव्याः वाद्यम् अस्ति ?**
(क) लक्ष्म्याः (ख) पार्वत्याः (ग) सरस्वत्याः (घ) दुर्गायाः

**३ ) वेणोः सम्बन्धः केन सह वर्तते ?**
(क) रामेण (ख) कार्त्तिकेयेन (ग) विष्णुना (घ) कृष्णेन

**४ ) भारतस्य प्राचीनतमं वाद्यं किं वर्तते ?**
(क) मृदङ्गम् (ख) वीणा (ग) शङ्खः (घ) वेणुः

**५ ) एतेषु किं वाद्यम् एकं यन्त्रं नास्ति ?**
(क) वेणुः (ख) जलतरङ्ग (ग) शहनाई (घ) सारङ्गी

**६ ) हिन्दुस्तानीसङ्गीते स्वराणां सङ्ख्या कियती वर्तते?**
(क) पञ्च (ख) सप्त (ग) नव (घ) एकादश

**७ ) एतासु का दक्षिणस्य नृत्यशैली नास्ति ?**
(क) कूडीयत्तम् (ख) गरबा (ग) मोहिनीयत्तम् (घ) उदटनथुलै

उत्तराणि – (१) ख (२) ग (३) घ (४) ख (५) ख (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT FOUNDATION
|| जयतु संस्कृतं जयतु भारतम् ||

- શું તમે સંસ્કૃત બોલવા ઇચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઇચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત ફાઉન્ડેશન દ્વારા આયોજિત

## Diploma In Sanskrit Teaching

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતા :

- ➜ તાલીમ માટેનું ગુણવત્તાયુક્ત વાતાવરણ.
- ➜ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
- ➜ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
- ➜ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરો: ડૉ. મિહિર ઉપાધ્યાય **9824616237**

EKLAVYA SANSKRIT FOUNDATION
|| जयतु संस्कृतं जयतु भारतम् ||



## स्तोत्रपाठः

**( शिवमहिम्नः स्तोत्रम् ) Online**

**Date :** 10/8/26 to 31/8/26
**Day :** Mon-Wed-Fri
**Time :** 7.00am to 8.30am
**Fees :** ₹ 999/-

**Online/ Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

**Third Level**

**Date :** 10/8/26 to 6/11/26
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 7000/-

**Contact :**
Dr. Mihir Upadhyay
+(91) 098246 16237

**Venue:**
Core House,
Off CG Road, Ah'bad

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006